चारकैः" मनुः अहार्य्यैरभेद्यैः" कुल्लू०। अहार्य्यमेव स्वगनाभिपट्टम्" गणरत्न०। "अहार्य्यं ब्राह्मणद्रव्यं राज्ञां नित्यमिति स्थितिः" मनुः।

**अहि** पु० आहन्ति आ+हन+डिन् टिलोपः आङो ह्रस्वश्च। १सर्पे, लोकप्रसिद्धसर्पभेदादि सुश्रुते दर्शितम्। "अशीतिस्त्वेव सर्पाणां भिद्यते पञ्चधा तु सा"। "दर्व्वीकरा मण्डलिनो राजिमन्तस्तथैव च। निर्व्विषा वैकरञ्जाश्च त्रिविधास्ते पुनः स्मृताः॥ दर्व्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः। तेषु दर्व्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः। द्वाविंशतिर्मण्डलिनो राजिमन्तस्तथा दश। निर्व्विषा द्वादश ज्ञेया वैकरञ्जास्त्रयस्तथा। वैकरञ्जोद्भवाः सप्त चित्रामण्डलिराजिलाः। पदाभिहृष्टा दुष्टा वा क्रुद्धा ग्रासार्थिनोऽपि वा। ते दशन्ति महाक्रोधास्तद्वि त्रिविधमुच्यते। सर्पितं रदितं वापि तृतीयमथ निर्व्विषम्। सर्पाङ्गाभिहतं केचिदिच्छन्ति खलु तद्विदः। पदानि यत्र दन्तानामेकं द्वे वा बहूनि च॥ निमग्नान्यल्परक्तानि यान्युद्वृत्य करोति हि। चञ्चुमालकयुक्तानि वैकल्यकरणानि च। संक्षिप्तानि सशोफानि विद्यात्तत् सर्पितं भिषक्। राज्यः सलोहिता यत्र नीलाः पीताः सितास्तथा। विज्ञेयं रदितं तत्तु ज्ञेयमल्पविषञ्च तत्। अशोफमल्पदुष्टासृक् प्रकृतिस्थस्य देहिनः। पदं पदानि वा विद्यादविषं तच्चिकित्सकः। सर्पस्पृष्टस्य भीरोर्हि भयेन कुपितोऽनिलः। कस्यचित् कुरुते शोफं सर्पाङ्गाभिहतन्तु तत्। व्याधितोद्विग्नदष्टानि ज्ञेयान्यल्पविषाणि तु। तथातिवृद्धबालातिदष्टमल्पविषं स्मृतम्। सुपर्णदेवब्रह्मर्षियक्षसिद्धनिषेविते॥ विषघ्नौषधियुक्ते च देशे न क्रमते विषम्। रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः॥ ज्ञेयादर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः। मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः॥ ज्ञेया मण्डलिनः सर्पा ज्वलनार्कसमप्रभाः। स्निग्धा विविधवर्णाभिस्तिर्य्यगूर्द्ध्वञ्च राजिभिः॥ चित्रिता इव ये भान्ति राजिमन्तस्तु ते स्मृताः। मुक्तारूप्यप्रभा ये च कपिला ये च पन्नगाः॥ सुगन्धिनः सवर्णाभास्ते जात्या ब्राह्मणाः स्मृताः। क्षत्रियाः स्निग्धवर्णास्तु पन्नगा भृशकोपनाः॥ सूर्य्यचन्द्राकृति च्छत्रं लक्ष्म तेषां तथाम्बुजम्। कृष्णा वज्रनिभा ये च लोहिता वर्णतस्तथा। धूम्राः पारावताभाश्च वैश्यास्ते पन्नगाः स्मृताः॥ महिषद्वीपिवर्णाभास्तथैव परुषत्वचः। भिन्नवर्णाश्च ये केचिच्छूद्रास्ते परिकीर्त्तिताः॥ कोपयन्त्यनिलं जन्तोः फणिनः सर्व्व एव तु। पित्तं मण्डलिनश्चापि कफञ्चानेकराजयः॥ अपत्यमसवर्णाभ्यां द्विदोषकरलक्षणम्। ज्ञेयौ दोषैश्च दम्पत्योर्विशेषश्चात्र वक्ष्यते॥ रजन्याः पश्चिमे यामे सर्पाश्चित्राश्चरन्ति हि। शेषेषूक्ता मण्डलिनो दिवा दर्व्वीकराः स्मृताः॥ दर्व्वीकरास्तु तरुणा वृद्धा मण्डलिनस्तथा। राजिमन्तो वयोमध्ये जायन्ते मृत्युहेतवः॥ नकुलाकुलिता बाला वारिविप्रहताः कृशाः। वृद्धा मुक्तत्वचो भीताः सर्पास्त्वल्पविषाः स्मृताः। तत्र दर्व्वीकराः। कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकपोतो बलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः ककुदपद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्प ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्द्द आशीविष इति॥ मण्डलिनस्तु। आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्पो मिलिन्दको गोनसो वृद्धगोनसः पनसो महापनसो वेणुपत्रकः शिशुको मदनः पालिन्हिरः पिङ्गलस्तन्तुकः पुष्पपाण्डुः षडङ्गोऽग्निको बभ्रुः कषायः कलुषः पारावतो हस्ताभरणश्चित्रक एणीपद इति॥ राजिमन्तस्तु। पुण्डरीको राजिचित्रोऽङ्गुलराजिर्विन्दुराजिः कर्दमकस्तृणशोषकः सर्षपकः श्वेतहनुर्दर्भपुष्पश्चक्रको गोधूमकः किक्किसाद इति॥ निर्व्विषास्तु। गलगोली शूकपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली ज्योतीरथः क्षीरिकापुष्पकोऽन्धाहिकोऽहिपताको गौराहिको वृक्षेशय इति। वैकरञ्जास्तु त्रयाणां दर्व्वीकरादीनां व्यतिकराज्जाताः। तद्यथा। माकुलिः पोटगलः स्निग्धराजिरिति। तत्र कृष्णसर्पेण गोनस्यां वैपरीत्येन वा जातो माकुलिः। राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः। कृष्णसर्पेण राजिमत्यां वैपरीत्येन वा जातः स्निग्धराजिरिति। तेषामाद्यस्य पितृवद्विषोत्कर्षो द्वयोर्मातृवदित्येके। त्रयाणां वैकरञ्जानां पुनर्दिव्येलकरोध्रपुष्पकराजिचित्रकाः पोटगलः पुष्पाभिकीर्णो दर्भपुष्पो वेल्लितकः सप्त तेषामाद्यास्त्रयो राजिलवत् शेषा मण्डलिवत्। एवमेतेषां सर्पाणामशीतिरिति। तत्र महानेत्रजिह्वास्यशिरसः पुमांसः, सूक्ष्मनेत्रजिह्वास्यशिरसः स्त्रियः। उभयलक्षणामन्दविषा अक्रोधा नपुंसका" इति। तेषां